3218333

M – 2020

Register Number : | | | | | |

Subject Code : **09 (NS)**

## SANSKRIT

Time : 3 Hours 15 Minutes] [Total No. of questions : 56] [Max. Marks : 100

I. एक वाक्येन संस्कृतभाषया उत्तरं लिखत। **(10 × 1 = 10)**

1) अद्यापि देवाः कुत्र जन्म इच्छन्ति?

2) विक्रमादित्याकथां का कथयति?

3) प्रव्राजकः वणिजः गृहं किमर्थम् अगच्छत्?

4) पौरवः कः?

5) राणाप्रतापः कस्मिन् ग्रामे अजायत?

6) महाश्वेता किम् अजिघ्रत्?

7) सुन्दरः किमर्थं नगरम् आगच्छति?

8) कर्णस्य रक्षाकवचं किम्?

9) के धनमिच्छन्ति?

10) ध्वन्यालोकः कन्नडभाषायां केन अनूदितः?

II. द्वित्रैः वाक्यैः संस्कृत भाषया कन्नड भाषया आङ्ग्ल भाषया वा उत्तरं लिखत। **(पञ्चानाम्)** **(5 × 2 = 10)**

11) पञ्चद्वीपानां नामानि लिखत।

12) विक्रमादित्यः राक्षसं किम् उपदिशति?

P.T.O.

13) राजपुत्रः मञ्जूषां प्राप्य किं करोति?

14) बिल्लाः राणप्रतापं कथं साहाय्यम् अकुर्वन्?

15) कीदृशं कुसुमगन्धम् अजिघ्रम् इति महाश्वेता वदति?

16) शान्तिः किमर्थं तरूणं द्रष्टुम् आगतवती?

17) शास्त्रिणाम् पाठनक्रमः।

III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड भाषया आङ्ग्ल भाषया वा लिखत। **(त्रयाणामेव)**

**(3 × 3 = 9)**

18) ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम्।
अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद।।

19) प्रातर्बुद्ध्वा च तत्सर्वं जहास सकलो जनः।
ननन्द स वणिक् सा च तत्सुता प्राप्तसत्पतिः।।

20) अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्।।

21) धन्योऽस्मि गमनात्पूर्वमीदृशी सम्पदागता।
विना तु गुरुशुश्रूषां नान्यद्द्राव्यं परं मम।।

22) कामक्रोधौ तथा लोभं स्वादं शृङ्गारकौतुके।
अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत्।।

IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत। **(चतुर्णामेव)** (4 × 2 = 8)

23) अद्यप्रभृति मनुष्यभक्षणं परित्यज।

24) अनार्य, आत्मनो हृदयानुमानेन पश्यसि।

25) मम हस्ते प्रभूतं धनं विद्यते।

26) 'भगवन् ! किंमभिधानः'?

27) दृढीक्रियतां चेतः।

28) परीक्षार्थम् इतोऽपि समयावकाशः विद्यते।

V. दश वाक्यैः संस्कृत भाषया कन्नड भाषया आङ्ग्ल भाषया वा उत्तरं लिखत। **(पञ्चानामेव)** (5 × 5 = 25)

29) पुराणेषु भारतं कथं वर्णितम्?

30) विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः?

31) 'निर्विमर्शा हि भीरवः' इति शीर्षिकां समर्थयत?

32) अङ्गुलीयकप्रसङ्गः।

33) भामाशाहस्य राजभक्तिः।

34) शान्तिदर्शनात् तरूणस्य चिन्तासन्ततिः।

35) कर्णशापप्रसङ्गः

36) शास्त्रिणाम् शिष्यवात्सल्यम्।

VI. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत। (4 × 1 = 4)

37) वैरिणां ____________ समुद्रोपमम् आसीत्।

38) ____________ गन्धम् अभ्यजिघ्रम्।

39) मे हृदयात् किल्बिषमेकं ________।

40) विद्या ________ रक्ष्यते।

(निर्मूलितवति, योगेन, कुसुम, सैन्यं)

VII. 41) संयोजयत। (4 × 1 = 4)

| | अ | | आ |
|---|---|---|---|
| i) | जाह्नवी | a) | ऋषिकुमारकः |
| ii) | पौरवः | b) | वस्त्रापणम् |
| iii) | पुण्डरीकः | c) | दुष्यन्तः |
| iv) | पुत्थलिका | d) | गङ्गा |

VIII. रेखाङ्कितनि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत। **(त्रयाणामेव)** (3 × 1 = 3)

42) पुत्थलिका <u>भोजराजं</u> प्रति अब्रवीत्।

43) कालिदासस्य <u>सप्त</u> कृतयः।

44) 'मेवाड' इति स्थलं <u>राजस्थाने</u> प्रसिद्धमासीत्।

45) गन्धर्वधिपतिः <u>हंसः</u>।

46) <u>उद्योगाः</u> अस्मत् प्रतीक्षायां न तिष्ठन्ति।

IX. यथा निर्देशं कुरूत। **(चतुर्णामेव)** (4 × 3 = 12)

47) सन्धिं विभजत / योजयत। **(त्रयाणामेव)**

गण्योऽस्मि, विषयामिषम्, देवाः + ते, यत् + अहम्, तु + अगम्याः

48) विग्रहवाक्यं / समस्तपदं लिखत।। **(त्रयाणामेव)**

कामक्रोधौ, अनवश्यकम्, गान्धर्वेण विधिना, जनैः आकीर्णः, मदीयं कपोलम्।

49) लिङ्ग – विभक्ति – वचनानि लिखत। **(द्वयोरेव)**

नगरी, पौरवैः, सलिलम्, वाचा।

50) लकार – पुरुष – वचनानि लिखत। **(द्वयोरेव)**

लभते, आसीत्, भक्षय, अपनेष्यामि।

51) पदपरिचयं कुरूत। **(त्रयाणामेव)**

अध्येतव्यः, विदित्वा, प्रतिसंहर्तुम्, पतन्।

52) प्रयोगं परिवर्तयत।

अ) विधिना दर्शितं प्रभुत्वम्।

अथवा

आ) अहम् एतद् धनम् स्वीकर्तुं न इच्छामि।

53) अलङ्कारं सलक्षणं निर्दिशत।

अ) चिच्छेद पापस्य कपिः निग्रहज्ञः इव क्रुधा।

अथवा

आ) रतेः बाष्पबिन्दुभिः आरचितामिव स्फटिकाक्षमालिकाम्।

54) कन्नड भाषया आङ्ग्ल भाषया अनुवदत। **(5)**

आधुनिकमानवः प्रपञ्चे किं प्रवर्तते इति ज्ञातुम् इच्छति। ग्रामे, नगरे, देशे, विदेशेऽपि प्रतिदिनं, प्रतिक्षणं प्रवर्तमानानि घटनानि ज्ञातुं समूहमाध्यमः अत्यवश्यकः। समूहमाध्यमेषु बहवः जनाः अहोरात्रं कार्यं कुर्वन्ति। एषु आकाशवाणी, दूरदर्शनं, साक्ष्यचित्राणि, पुस्तकानि, वार्तापत्रिकाः दूरवाणी, सङ्गणकयन्त्रम् इत्यादयः प्रमुखाः। समूहमाध्यमः राष्ट्रियैकतां संरक्षति।

55) संस्कृतभाषया अनुवदत। **(5)**

ಗೋಪಾಲಕೃಷ್ಣ ಗೋಖಲೆಯವರು ಅಪ್ರತಿಮ ದೇಶಭಕ್ತರಾಗಿದ್ದರು. ಭಾರತದ ಸ್ವಾತಂತ್ರ್ಯ ಸಂಗ್ರಾಮದಲ್ಲಿ ಅವರು ಪ್ರಮುಖ ಪಾತ್ರ ವಹಿಸಿದ್ದರು. ಅವರು ಉತ್ತಮ ವಾಗ್ಮಿಗಳೂ ಆಗಿದ್ದರು. ಜನರು ಅವರ ಮಾತಿನಿಂದ ದೇಶಭಕ್ತಿಯ ಪ್ರೇರಣೆಯನ್ನು ಪಡೆದು ಸ್ವಾತಂತ್ರ್ಯ ಚಳುವಳಿಯಲ್ಲಿ ಭಾಗವಹಿಸಿದರು. ಅವರು ತಮ್ಮ ಸರಳ ಹಾಗೂ ನಿಸ್ವಾರ್ಥ ಜೀವನದಿಂದ ಎಲ್ಲರಿಗೂ ಆದರ್ಶಪ್ರಾಯರಾಗಿರುವರು.

Gopala Krishna Gokhale was a great patriot. He lead the freedom movement prominently. He was a very good orator too. The people joined the freedom movement, having listened to his inspring patriotic speech. His simple and selfless life is a role model to all.

56) अ) इयं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। **(5 × 1 = 5)**

द्रौपद्यर्थं सौगन्धिका पुष्पमानेतुं गच्छन् भीमसेनः मार्गमध्ये अतिकायं वृद्ध वानरं पश्यति। तं निद्रितं मत्वा प्रबोधयितुं सिंहनादं करोति। प्रबोधितः वानरः भीमसेनं तस्य परिचयं पृच्छति। भीमसेनः आत्मानं हनूमतः भ्राता इति परिचाययति। कपिः स्वस्य निश्शक्तिं निरूपयन् स्वपुच्छं उत्सार्य गन्तुं सूचयति। प्रयत्ने विफलो जातः भीमः कपेः परिचयं पृच्छति। तदा कपिः स्वं केसरिनन्दनः वायुजातः हनूमान् इति परिचाययति भीमसेनेन प्रार्थितः स्वस्य विराटरूपं दर्शयति।

प्रश्नाः

i) भीमसेनः मार्गमध्ये कं पश्यति?

ii) भीमसेनः निद्रितं कपिं प्रबोधयितुं किं करोति?

iii) भीमसेनः आत्मानं किमिति परिचाययति?

iv) कपिः भीमसेनं किं सूचयति?

v) कपिः स्वं किमिति परिचाययति?

अथवा

आ) संस्कृतोत्सव कार्यक्रमं उद्दिश्य मित्रम् प्रति पत्रं लिखत।